अपामार्जनस्तोत्र

नं. १५६३

No 5990

F = 11

सं २५४३ क.
[illegible]
१२५
श्लोकाः
सं. १८३२ शि

Compleet

१

ॐ श्रीविघ्नहर्त्रे नमः दाल्भ्य उवाच अनाराधितगोविं
दायेन राज्ञः ख्वभागिनः तेषां दुःखाभिभूतानां यत्कर्तव्यं
दयालुभिः पश्यद्भिः सर्वभूतस्थं वासुदेवं महात्मने स
मदृष्टिभिरीशेशतन्ममब्रूहि शेषतः पुलस्त्य उवाच सौ
वर्णं राजतं ताम्रं मृण्मयं वा नवं दृढं अव्रणं कलशं शु
द्धं स्थापयेन्मण्डलोपरि तत्रोदकं समानीय शुद्धं निर्म
लमेव च पंकशतं कुशाग्राणि स्थापयेत्कलशोपरि

गृहीत्वातुसमूलाग्रान्कुशान्शुद्धांश्चरोगिणः मार्ज
येत्सर्वगात्राणिकुशाग्रैःदाल्भ्यशांतिकृत् रोगग्रह
विषार्तानांकुर्याच्छांतिमिमांशुभां विष्णुभक्तोविशेष
णाच्छुचिस्नातमानसः वाराहंनारसिंहंचवामनंवि
ष्णुमेवच ध्यात्वासमाहितोभूत्वादिव्यनामानिविन्य
सेत् पूर्वेनारायणःपातुवारिजाक्षस्तुदक्षिणे प्रद्यु
म्नःपश्चिमेपातुवासुदेवस्तथोत्तरे ऐशान्यांरक्षको

२

विल्लग्राग्रेष्व्यांतुजनार्दनः नैऋत्यांपद्मनाभस्तुवा
यव्यांमधुसूदनः ऊर्ध्वंगोवर्धनोदेवोधरायांचत्रिवि
क्रमः एताभ्योदशदिग्भ्यस्तुसर्वतःपातुकेशवः
अंगुष्टाग्रेतुगोविंदंतर्जन्यांतुमहीधरं मध्यमायां
हृषीकेशमनामायांत्रिविक्रमं कनिष्ठायांन्यसे
द्विल्लंकरमध्येतुमाधवं शिखायांकेशवंन्यस्य
मूर्ध्निनारायणंन्यसेत् माधवंतुललाटेतुगोविं

दंतभुवोमध्यतं चक्रमंमध्येन्यसेद्विलं श्रवणोमधु

सूदनं त्रिविक्रमंकपोलेतुवामनंकर्णमूलयोः दा

मोदरंदंतपंक्तौवाराहंचिबुकेतथा जिह्वायांवासु

देवंतुतत्वविवेगरुडध्वजं हृषीकेशमनरोष्टेपद्मना

भंतथापरे वैकुंठंकंठमध्येतुनाभावनंतमप्यथ

दक्षिणेतुभुजेविप्रविन्यसेत्पुरुषोत्तमं वामेतुयो

गिनंन्यस्यराघवंहृदिविन्यसेत् पीतवाससमा

३

ऽऽकायेहरिंनाभ्यांतुविन्यसेत् करेतुदक्षिणेविप्र
ततःसंकर्षणंन्यसेत् वामेरितुहरंविंद्यात्कटिम
ध्येजनार्दनं पृष्ठेक्षितिधरंविंद्यादच्युतंस्कंधयम्
लयोः वक्षःस्थलेमाधवंतुकक्षयोर्योगशायि
नम् स्वयंभुवंमेढ्रमध्येऊर्वोश्चैवगदाधरम्
चक्रायुधंजानुमध्येजंघयोरच्युतंतथा गुल्फ
योर्नारसिंहंतुपादपृष्ठेमितौजसं अंगुल्यां

श्रीयरंन्यस्यपंकजादंतुमेथिष गोमहूपेगुडाके
शांकूलंरक्ताक्ष्यिमजमुन विष्णुमाधवंचैवन्यसेत्पा
दतलेच्युतंमनोवुध्योरहंकारेचितेन्यसेजनार्दनं
एवंन्यासविधिंकृत्वासाक्षान्नारायणोभवेत् तन्नुर्वि
लुमयीतस्ययावत्किंचिन्नभाष्यते एवंन्यासविधिं
कृत्वायत्कार्यंश्रणुतद्विज वैल्लवेनतुकर्त्तव्यंसर्व
सिद्धिःप्रदायकं पूजाकालेतुदेवस्यस्नानकालेत

ध्येयवच्च होमारंभेचकर्तव्यंत्रिसंध्यास्तुचनित्यशः अ
भयंसर्वभूतेभ्योविष्णुलोकंसगच्छति विष्णुलोकं
सगच्छत्यों नमः ॐनमः परमार्थायेत्याद्यपामार्ज
नमंत्रस्यपुलस्त्यऋषिः श्रीनृसिंहोदेवताह्रदाम्बु
कस्येतिबीजं अच्युतानंतगोविंदेतिशक्तिः तमहा
टककेशांनेतिकीलकम् समस्ताभिलषितार्थे
पाठेविनियोगः ॐनमः पुरुषार्थायपुरुषाय

महात्मने ब्रह्मरूपवत्कूर्मरूपायव्यापिनेपरमात्मने
निष्कलंमषायशुद्धायध्यानयोगरतायचनमस्कृ
त्वाप्रवक्ष्यामियन्नत्तिस्यतमेववचः वाराहंनारसिं
हंवामनंविल्हमेवच नमस्कृत्वाप्रवक्ष्यामिय
न्नत्तिस्यतमेववचः त्रिविक्रमायरामायवैकुंठाय
नरायचच नमस्कृत्वाप्रवक्ष्यामियन्नत्तिस्यतमेव
चः वाराहनारसिंहेशवामनेशत्रिविक्रम हय

५

ग्रीवेशसर्वेशाहृषीकेशाहरामुमं अपराजितच

क्राद्यैश्चतुर्भिःपरमायुधैः आवंडितानुभावैस्त्वं

5

सर्वदुष्टहरोभव हरामुकस्यदुरितंदुष्कृतंदुरु

पोषितं मृत्युबंधार्त्तिभयदंदुरिष्टस्यचयत्फलं

परायध्यानसहितःप्रयुक्तंचाभिचारकं गारस्प

र्शमहारोगप्रयोगंजरयाजन हरयेवासुदेवाय

नमःक्रूलायविज्ञिने नमःपुष्करनेत्रायकेश

वायादिचक्रिणे नमः कमलकिंजल्कपीतनिर्म

लवाससे महाहवरिपुस्कंधकृष्टचक्रायचक्रिणे

दंष्ट्रोद्धृतक्षितिभृतेत्रयीमूर्त्तेनमोनमः महायज्ञ

वराहायशेषभोगाङ्कशायिने तप्तहाटककेशान्त

ज्वलत्पावकलोचन वज्राधिकनखस्पर्शदिव्यसिं

हनमोस्तुते काश्यपायादिह्रस्वायऋग्यजुःसाम

रूपिणे तुभ्यंवामनरूपायक्रमतेगांनमोनमः

६ 6

वराहाशेषदुष्टानि सर्वपापफलानि वै मर्द्द मर्द्द महादंष्ट्र मर्द्द मर्द्द च यत्फलं नरसिंह करालास्य दंतप्रांतानलोज्वल भंज भंज निनादेन दुष्टान्यस्यार्त्तिनाशन: ऋग्यजु:सामगर्भाभिर्वाग्भिर्वामनरूपधृक प्रशमं सर्वदु:खानि नयत्वस्य जनार्द्दन: ऐकाहिकं द्याहिकं च तथा त्रिदिवसज्वरं चातुर्थिकं तथात्युग्रं तथैव सततज्वरं दोषोत्थं सन्नि

यातोत्थंतथैवागंतुकज्वरं शमनयाश्च गोविंदछिं
धिह्यस्यवेदनां नेत्रदुःखंशिरोदुःखंदंतदुःखंचोद
रसंभवं अन्नक्षासमतिश्वासंपरितापंसवेपथुं गुद
ग्राणांछिद्ररोगांश्चकुष्ठरोगांतथाज्वरं प्लीहादीनेव
जान्रोगान्त्वगाश्रयान्तर्वहिःस्थितान् कामलादीन्ना
थ्यारोगान्प्रमेहांश्चातिदारुणान् भगंदरातिसा
रांश्चसर्वरोगांसवल्लउली अश्मरीमूत्रकृच्छ्रं

८

7

श्चरोगानन्यांश्चदारुणान् येवातप्रभवारोगायेच
पित्तसमुद्भवाः कफोद्भवाश्चयेरोगायेचान्येसान्नि
पातिकाः आगंतुकाश्चयेरोगालूताविस्फोटका
दयः तेसर्वेप्रशमंयांतुवासुदेवापमार्जिताः
विलयंयांतुतेसर्वेविष्णोरुच्चारणेनतु क्षयंग
च्छंतुचाशेषास्तेचक्राभिहताहरेः अच्युतानंत
गोविंदनामोच्चारणभीषिताः नश्यंतिसकला

रोगाः सत्यं सत्यं वदाम्यहं सत्यं सत्यं पुनः सत्य
मुद्धृत्य भुजमुच्यते वेदशास्त्रात्परं नास्ति न दैवं के
शवात्परं स्थावरं जंगमं वापि कृत्रिमं चापि यद्वि
षं दंतोद्भवं नखोद्भूतमाकाशप्रभवं विषं लूता
दिप्रभवं यच्च विषमत्यंतदुःखदं शमं नयत्तु त
त्सर्वं कीर्तितोस्य जनार्दनः ग्रहान्प्रेतग्रहांश्चैव त
था वै डाकिनीग्रहान् वेतालांश्च पिशाचांश्च गंध

८ वीयजगाज्ञमान् शाकुनीपूतनाद्यांश्चतथावैना
यकग्रहान् स्कंदमंडनिकांक्रूरांरेवतींवृद्धरेवतीं
8 वृद्धिकाख्यान्ग्रहांश्चोग्रांस्तथामातृग्रहानपि बा
लस्यविस्तोश्चरितंहंतुंबालंग्रहानिमान् वृद्धा
नायेग्रहाःकेचिद्येचबालग्रहाःक्वचित् नरसिंह
स्यतेदृष्ट्वादग्धायेचापियौवने दंष्ट्राकरालवद
नोनरसिंहोमहारवः ग्रहानशेषान्निःशेषान्क

रोतिजगतोहिमः नरसिंहमहासिंहज्वालामालो
ज्वलाननं ग्रहानशेषान्सर्वेशावादावादाग्निलो
चन ये रोगा ये महोत्पाता यद्विषं ये महाग्रहाः यानि
चक्रूरकर्माणिग्रहपीडाश्चदारुणाः शस्त्रक्षतेषु
येदोषाज्वालागर्दभिकादयः तानिसर्वाणिसर्वा
त्मन्परमात्मन्जनार्दन किंचिद्रूपंसमास्थायवा
सुदेवास्तुनाशाय क्षिप्तासुदर्शनंचक्रंज्वालामा

९

लातिभीषणं सर्वदुष्टप्रशमनंकृतदेववराच्युत
त्वदर्शनमहाज्वालछिंधिछिंधिचमारय सर्व
दुष्टानिरक्षांसिद्रूपयारिविभीषण प्राच्यांप्रती
च्यांदिशिचदक्षिणोत्तरतस्तथा रक्षांकरोतुस
र्वात्मानरसिंहःस्वगर्जितैः भुव्यंतरिक्षेचतथा
पार्श्वतःपृष्ठतोग्रतः रक्षांकरोतुभगवान्बहुरू
पीजनार्दनः यथाविष्णुर्जगत्सर्वंसदेवासुरमा

न्नुतम् तेनसत्येनसकलंडुष्टमस्यप्रशाम्यतु य
थाविष्णोस्स्मृतेसद्यः संक्लयंयांतिपातकं तेनसत्येन
सकलंडुमस्यप्रशाम्यतु परमात्मायथाविष्णुर्वेदां
तेषुचपिगीयते तेनसत्येनसकलंयन्मयोक्तंतथास्तु
तत् शांतिरस्तुशिवंचास्तुप्रणश्यत्वसुखंचतुयत्
वासुदेवशरीरोत्थैःकुशैःसंमार्जितोमया अपामार्जि
तगोविंदोनरोनारायणःप्रभुः ममास्तुसर्वदुष्टानां

९ 10

प्रणामोवचनाद्धरेः शांताःसमस्तरोगास्तेग्रहाः
सर्वेविषाणिच भूतानिप्रशमंयांतुसंस्मृतेमधु
सूदने एतत्समस्तरोगेषुभूतग्रहभयेषुच अ
पामार्जनकंशस्त्रंविष्णुनामाभिपूजितं सर्वबा
धापनुत्त्यर्थं उत्तमस्याभिहितंउरा यथाचक्रायु
धंविष्णोर्यथाशूलंहरस्यतु यथा वज्रंसुरेंद्रस्य
तथाविप्रकरेकुशा एतेकुशाविष्णुशरीरसंभ

वाजनार्दनोहं स्वयमेव चागतः हतं मयाऽनिष्ट
मशेषजंतोः स्वस्थो भवत्वेष यथा वचो हरेः शां
तिरस्तु शिवं चास्त्वनिष्टमस्य प्रणश्यतु यदस्य
दुरितं किंचिन्निमग्नं लवणार्णवे स्वास्थ्यमस्य
सदैवास्तु हृषीकेशस्य कीर्तनात् यत एवागतं
पापं तत्रैव प्रतिगच्छतु एतद्रोगादिपीडास्वजं
तूनां हितमीरितं विलम्भक्तेन कर्तव्यमपामा

११

जैनकंपरं अनेनसर्वज्ञष्टानिअपामार्जनकं
परं अनेनसर्वज्ञष्टानिप्रशामंयांत्यशेषतः स
र्वभूतहितार्थायकुर्यात्तस्मात्सदैवहि सर्वाप
रायप्रशमनंसर्वबाधाविनाशनं सर्वदोषहरं
पुण्यमपामार्जनकंपरं यस्तुभक्त्यापठेन्नित्यं
सर्वपापैःप्रमुच्यते तस्यतुष्यतिगोविंदोमनसा
चिंतितंलभेत् कोटिजन्मकृतंपापंपठनादेव

तष्पति गोसहस्रस्यदत्तस्यफलमेतदवाप्नु
यात् यइदंधारयेद्विद्वान्श्रद्धाभक्तिसमन्वितः
ग्रहास्तंनोपजिघ्रंतिनरोगानचराक्षसाः यत्पो
पशास्यःशाङ्गध्वःस्तवोयंमतिसत्तम पठतोश्र
एतंतांचैवददातिपरमांगतिम् इत्यपामार्जन
स्तोत्रंसमाप्तम् श्रीरस्तु श्रीनगरेलिखम् १९३२